वेददी० ताश्च याज्याः सूक्तविशेषात्मका गोत्रभेदेन भिन्नरूपाः "एकादश प्रयाजाः तेषां प्रैषाः प्रथमं प्रैषसूक्तसूक्तं द्वितीये । अध्वर्युप्रेषितोमैत्रावरुणः प्रेष्यति प्रैषैर्होतारम् । होता यजत्याप्रीभिः प्रैषलिङ्गाभिः" इत्युपक्रम्य "समिद्धो अग्निरिति" शुनकानां "जुषस्व नः समिधमिति वशिष्ठानां, "समिद्धो अद्येति"सर्व्वेषाम् यथाऋषि वा"इति आश्व०श्रौ० गोत्रभेदेन सूक्तभेदस्योक्तेः । अत्र नारायणवृत्तिः । "यो यस्य ऋषिस्तदानुगुण्य' यथर्षिशब्देनोच्यते तथा वाऽऽप्रीसूक्तं ग्रहीतव्यम् । स्वयं वा ऋषिनामधेयस्यानुगुणा आप्रयः कर्त्तव्या इत्यर्थः । तत्र भगवता शौनकेन यथाऋषिपक्षे आप्रीविवेकार्थमेव स्लोक उक्तः ।"कण्वाङ्गिरोऽगस्त्यशुनका विश्वामित्रोऽत्रिरेव च । वशिष्ठः कश्यपो वाध्र्यश्वो जमदग्निरथोत्तमः" । तत्र दशानां सूक्तानां प्रथमं कण्वानाम् "सुमिद्धो न आवह" इति । द्वितीयं तद्वर्जितानामङ्गिरसाम्, "समिद्धो अग्न आवह"इति । तृतीयमगस्त्यानाम्, "समिद्धो अद्य राजसि" इति। चतुर्थं शुनकानाम्, 'समिद्धो अग्निर्निहितः" इति । पञ्चमं विश्वामित्राणाम्, "समित्समित्सुमनाः" इति । षष्ठमत्रीणाम्, "ये समिद्धाय शोचिषे" इति । सप्तमं वशिष्ठानाम्, "जुषस्व नः समिध" इति । अष्टमं कश्यपानाम् "समिद्धो विश्वतस्पतिः"इति । नवमं वाध्र्यश्वानाम्, 'इमां मे अग्ने समिधं जुषस्वेड" इति । शुनकवाध्र्यश्वानाम् भृगूणां दशमं, "समिद्धो अद्य मनुषो दुरोणः" इति यथर्षिपक्षे विवेकोऽयम्" ।

**आप्रीत** त्रि० आ+प्री—क्त । १सम्यक्प्रीते २ईषत्प्रीते च । भावे क्त । सम्यक्प्रीतौ न० ।

**आप्रीतप** पु० आप्रीतं पाति पा—क । विष्णौ "अथ यद्याप्याय्यमानः किञ्चिदापद्येत विष्णवआप्रीतपाय स्वाहेति जुहुयात् विष्णुर्हि स तद्यांप्रीतपा भवत्यपपाप्मानं हत उपैनं यज्ञोनमति"शत०ब्रा० । क्विप् । आप्रीतपा अप्यत्र ।

**आप्लव** पु० आ+प्लु—घञभावपक्षे अप् । १स्नाने, जलानां सर्व्वतः समुच्छलने । ल्युट् आप्लवनम् तत्रैव न० ।

**आप्लवव्रतिन्** पु० आप्लवः समावर्त्तनस्नानमेव व्रतमस्त्यस्य इनि । स्नातके गृहस्थभेदे यस्तु वेदानधीत्य दारपरिग्रहार्थं कृतसमावर्त्तनस्नानः दारलाभात् प्राक् स्मार्त्तं व्रतविशेषमाचरति तादृशे द्विजे "अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्" स्मृत्युक्तं व्रतं च दर्शितं विधानपा० यथा 'स्नात्वैवं विधिना काले मासमात्रमपि द्विजः । अनाश्रमी न तिष्ठेत्तु सुखस्थस्तु प्रयत्नवान् । निःस्वोरोगादितोभीत आपन्नोऽन्यैश्च कारणैः । स्नातकः प्रयतो वह्निं न त्यजेदिति वै श्रुतिः । नित्यदा ब्रह्मचारी स्यात् पञ्चयज्ञपरायणः । जपतीर्थरतोवा स्यात् स्नातकोलौल्यवर्ज्जितः । श्राद्धे निमन्त्रितो गच्छेत् कुर्य्यात् षट्कर्म्म च द्विजः । येन केनाप्युपायेन व्रतचर्य्यां न लोपयेत् । शकलान् जुहुयात् प्रातः" स्मृतिः अत्र प्रातरितिविशेषणात् न सायम् । तेन प्रातः सन्ध्यामुपास्याग्निकार्य्यं कृत्वा शकलहोमः कार्य्यः तन्मन्त्राश्च तैत्तिरीयारण्ये पठिताः "देवकृतस्यैनसोऽवयजनमसि स्वाहेत्यादिकाः । तदीय होमद्रव्यविशेषोबौधायनेनोक्तः "सएष उपनयनप्रभृति व्याहृतिभिः षड्भिरेव समिद्भिः आ समावर्त्तनात् । समावर्त्तनप्रभृति आज्येनैव आ पाणिग्रहणात् । पाणिग्रहणप्रभृति व्रीहिभिर्यवैर्वा व्यस्तेनैकेन पञ्चाहुतो र्जुहुयात्" "वैश्वदेवं गृहस्थस्य प्रत्यहारम्भणं भवेत् । स्नातकेनापि तत्कार्य्यं पृथक्पाको गृहे यदि" शौनकः । "यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम् । छत्त्रञ्चोष्णीषमाले च पादुके चाप्युपानहौ । रौक्मे च कुण्डले वेणुं कृत्तकेशनखः शुचिः । स्वाध्याये नित्ययुक्तः स्यात् बहिर्माल्यञ्च धारयेत् । शुक्लाम्बरधरोनित्यं सुगन्धः प्रियदर्शनः । न जीर्णमलवद्वासा भवेच्च विभवे सति । न रक्तमुल्वणं चान्यधृतं वासो न कन्यिकाम्" कूर्म्मपु० । "उपानहौ च वासश्च धृतमन्यैर्न धारयेत् । उपवीतमलङ्कारं स्रजं कनकमेव च" मनुः । "स्नातः समुद्वहेत् कन्यां प्रव्रजेत्तद्निच्छुकः । वनस्थो वा भवेद्विप्रः सुखस्थो विधिना शुचिः । अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः । आश्रमेण विना तिष्ठन् प्रायच्चीयते हि सः"इति विधा पा० धृता स्मृतिः । तस्य कन्यालाभार्थं काम्यजप उक्त ऋग्विधाने "सुषुमं प्रजपेत् सूक्तमथ सम्यक् शिवालये । अयुतं तु जपेत् कन्यां षण्मासात् लभते नर" इति ।

अत्रानाश्रमदोषविषये किञ्चिदुच्यते स्नातको हि गृहस्थभेदोद्विजातिमात्रः समावर्त्तनस्नानस्य तेषामेव सम्भवात् । अतस्तद्विषयकमेवानाश्रमादिदोषोत्कीर्त्तनम् । तथा हि विधानपारिजातधृतयोः स्मृत्योः "स्नात्वैव विधिना काले" इत्यादौ स्नातः समुद्वहेत् कन्यामित्यादौ चोपक्रमे द्विजातिविषयकत्वावगमेन उपसंहारे चानाश्रमदोषकीर्त्तनं तद्विषयकमेव उपक्रमोपसंहारयोरेकविषयकत्वौचित्यात् । एतेन "स्वीकरोति यदा वेदं चरेद्वेद-